भगवानलालेन स्वहस्तेन विक्रमसंवत्सरे १९१७
लिखितं रामानुजमतज्ञानार्थं रामानुजाचार्य
कृतं तत्त्वत्रयं

श्रीमतेरामानुजाय श्रीमानखिललोकानां नायकः करुणा
करः करोतुमंगलंपुमांकमलानाथकोहरिः १ मुमुक्षोः
चेतनस्यमोक्षनिष्पत्तौतत्त्वज्ञानंसंपादनीयं तत्त्वंचयंच
चिदचिदीश्वरः चिदित्यात्मोच्यते आत्मादेहेंद्रियम
नसः नः प्राणबुद्धिविलक्षणः अजडानंदरूपनित्यो एक
रूपस्तोचित्यो निरवयवोनिर्विकारो ज्ञानाश्रयईश्वर
स्यनियाम्योधार्यः शेषभूतश्च आत्मनोदेहादिवैलक्ष
ण्यंकथमितिचेदुच्यते देहादयोममेतिव्यतिरेकप्रतिते
रिदमितिप्रतितेः आत्मनोअहमितिप्रतितेः एतत्प्र
त्यक्षस्यकादाचित्वादात्मनश्चैकरूप्यस्यचप्रतीय

मानत्वात् श्रेनेशंवक्ष्यतेचात्मनएकत्वाच्चदेहादिविलक्षणेना
त्मनाज्ञात्वं विदुषोथग्यतःपुंसःशिरःपाण्यादिलक्षणइतिश्रु
त्यंचात्रप्रमाणं अजडत्वंनाम ज्ञानान्तरमंतरेणप्रकाशमा
नत्वं अनंदत्वंनाम सुखरूपत्वंसुखोचितस्यसुखमहम
स्वाप्समिति प्रत्यवमर्शात्सुखरूपत्वंजायते नित्यत्वंना
मसर्वदाविद्यमानत्वं नित्यत्वेजन्ममरणेकथमितिचेत्
जन्मनामदेहसंबंधमरणंतुदेहवियोगः अएकत्वंकथमि
तिचेत् हृदयप्रदेशंव्रजेत्यादिनीतिशास्त्रंचबलात्
शास्त्रंचैतन्मतेनेशक्रमतीत्यादिकंदृष्टव्यं अएक
तोयंहृत्प्रदेशस्थितोयमितिचेत् पादेमेवेदनाशिरसिमे

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

मितिस्फुरत्वानुभवः कथमितिनवाच्यं मणिप्रभादीपा
दीनामेकदेशस्थितानामपिप्रभाययाव्याप्ता तथाज्ञानस्यर्व
त्वाद्धेतुत्वोपपत्तेः एकस्यपुंसःएककालएवनेकेइप
रीग्रहेपिज्ञानव्याप्यत्वंभवति व्यक्तत्वंनाम घटपटादिव
चक्षुरादिगोचरं अचिंत्यंनाम अचिन्सजातियोय
मितिचिंतयितुंमशक्यं निरवयवत्वंनाम अवयवस
मुदायरहितत्वं निर्विकारंनाम अविद्याकार्यप्रहाणेनैकरूप वि
त्वएवंविधात्मस्वरूपात्मिजलवातपादिभिः केइनदृ
नग्रावनशोषणाकर्षणायोग्यस्य अतएवदेहपरिमा
णपक्षोनुपपन्नः अणुत्वप्रतिपादकश्रुतिर्विरोधात्

अनेकदेहपरिग्रहेतुयोगिस्वरूपस्यौथित्यात्प्रसंगा
त्च ज्ञानाश्रयत्वंनाम ज्ञानियताश्रयत्वं ज्ञानात्मैवेति
नवाच्यं तथाहिअहंज्ञानमित्यव्यवहारात् ज्ञातृत्वमिति
ज्ञातृत्वात्तेवकर्तृत्वभोक्तृत्वमिति कर्तृत्वभोक्तृत्वयो
ज्ञानावस्थाविशेषत्वात् संख्यासुखसत्वादिगुणानामेवकर्तृ
त्वभोक्तृत्वं नात्मनइत्यजः तथाच चेतनस्यशास्त्रव
श्यताकर्तृत्वभोक्तृत्वंचचेतनस्यातांसांसारिकप्रयु
क्तोचेतनस्यब्रह्मत्वंसत्वादिगुणप्रयुक्तंकर्तृत्वंचेश्व
राधीनं ज्ञानाश्रयत्वेपिचिज्ञानंयस्यनुतइतिश्रुत्याक
थंज्ञानरूपत्वमुच्यतइतिचेत् ज्ञानस्यव्यतिरेकेणस्वस्य

प्रकाशमानत्वात् ज्ञानसारकृतगुणत्वं नित्यत्वं
चेत्यनिरूपकधर्मत्वाच्च ज्ञानव्यपदेशः नियाम्य
त्वेनाम ईश्वरबुध्याधीनत्वं स्वव्यापारत्वं धार्यत्वंनाम
ईश्वरस्वरूपसंकल्पानावेशत्वं शेषत्वंनाम
चंदनकुसुमतांबूलादिवत्भगवदिष्टविनियोगार्हत्वं
इंद्रचंद्रसूर्यादिवत्पृथक्स्थित्ययोग्यमेवमिति ३
आत्मानस्त्रयइनित्यमुक्तरूपेणत्रिधा बद्धाः संसारि
णः मुक्ताः संसारगमिताः नित्यास्तुकदाचित्संसारिणः
स्यन्नावाः तेचानंतगरुविष्वक्सेनाद्याः जलस्याग्नि
संसर्गस्थानिसंसर्गेणोष्णाद्युद्भवत आत्मनो

णुचिसंबंधेनाविद्याकर्मवासनारुचयोजायंते अचिन्त्यशे
षांतांशः कारणनाशे कार्यनाशः त्रिविधाश्चात्मनोनि
त्यस्यकेचित्आत्मनेनानात्वंनित्यंवा एकएवात्मासर्व
शरीरवर्तनेइत्याद्युः तत्पक्षे एकस्मिन्सुखित्वदुःख
स्यदुःखमनुपपन्नं देहभेदेनोपपद्यतेइतिचेत् सोन्यो
न्यशरीरेपिसमवस्थास्यात् एकस्यसंसरणंएकस्यमु
क्तिः एकस्यशिशुत्वंएकस्यार्यत्वंनयट् मनुष्यस्य
मनुष्यस्यावरादिविशमसृष्टिश्चनोपपद्यते नित्यानि
त्यानां एकोबहूनांयोविरुध्यतिकामानित्यादिभेद
प्रतिपादकश्रुतिविरोधात् अविद्यकभेदविषयाश्च

४ निरिति चैन्नमोक्षदशायामपिसद्रूपप्रकाशस्यः इतिभेददर्शनात् मोक्षदशायांदेवादिभेदाभावेपि समपरिमाणत्रिभेदादर्शनात् मोक्षदशायांदेवादिभेदाभावेपिसमपरिमाणत्रीह्यादिभेदवत्आत्मस्वरूपंभेदसिद्धः तस्मादात्मभेदोनिकार्यः एतेनाजडत्वेसतिज्ञातृत्वं ज्ञानंच आत्मवन्नित्यद्रव्यमजडमानंदरूपंच तर्हिज्ञानात्परस्वरूपयोः कोविशेषइतिचेत् उच्यते आत्माप्रमासंकोचविकाररहितः इतरप्रकाशकः स्वयंप्रकाशकः अणुपरिमाणश्च ज्ञानंतुधर्मःसंकोचविकाशयोग्यं इतरप्रकाशकं परस्मैस्वयंप्रकाशकंज्ञानं महत्परिमाणंच अत्र ४

केषांचित्ज्ञानंसर्वदाविद्यतेः केषांचिदविद्यतेः केषांचित्कदाचिदविद्यतेः कदाचिद्विद्यतेः ज्ञानस्यनित्यत्वेदृष्टांतेनजातंनष्टमितिव्यवहारः कथमितिचेदुच्यते यदाइंद्रियद्वारा विशयान्नगृह्णातिनदाज्ञानंजानातीतिव्यवहारः यदा नगृह्णातिनदानष्टमितिज्ञानस्यैकत्वेपिप्रसरणभेदेनानाप्रतीतेः क्रियागुणाश्रयत्वाच्चद्रव्यत्वं अजडंस्वयंप्रकाशकं अजडत्वेस्वयंत्वादेः कथंनप्रतीयतइतिचेत्प्रसारणाभावात् तत्राप्रतितिः आनंदरूपत्वं अनुकूलत्वंच प्रतीतिवेलायांविषयाद्यस्यादिदर्शनेप्रतिकूलप्रतितिः दृष्ट

यदा नगृह्णाति तदा नष्टं

त्मभ्यांन्तीति निरुक्त्या भगवदात्मकत्वात् सर्वस्यपदार्थस्यानु
कूल्यंहिस्वाभाविकं प्रातिकूल्यंचोपाधिकं अत्रप्रस्तुतयानुसं
धेयमानस्यपदार्थस्यानुकूल्येस्वभावत्वेकस्यचित्क
दाचिदनुकूलत्वंदेशकालादिनांदेशांतरेकालान्तरेप्रति
कूल्यस्यैवमात्मानिरूपितः एतेषांप्रमाणानिभाष्या
दिषुदृष्टव्यानि इतिश्रीमन्नारायणमुनिविरचितेतत्त्व
चिन्तनेचित्स्वरूपं। अथाचित्स्वरूपंनिरूप्यते अचिद्द्रव्यं
ज्ञानशून्यंविकारास्पदं एतच्चशुद्धसत्त्वमिश्रसत्त्वसत्त्वस
त्त्वमिश्रभेदात्त्रिविधं शुद्धसत्त्वंनामरजस्तमोरहित
केवलसत्त्वपरिणामंनित्यंतानानेदजनकं अप्राकृतं अ

कर्म्मीयसंकेवलसगवदिलयाविमानमंदपगोपुरसका
रादिरूपेणनिरवधिकतेजोरूपंनित्यमुक्तेश्वरेणअप्र
रिछेद्यत्वात्सतं एतच्चकेचिज्जडमित्याहुः केचिदजडमित्याहुः
द्वितीयपक्षेनित्यमुक्तानांज्ञानसंतरेणापिप्रकाशतेनस
मानं नहि आत्मजडयोः कथंचिन्नत्वमितिनवाच्यं
यते अहमित्यप्रतीतेः शरीरादिरूपेणपरिणमद्विष
यसंतरेणप्रतीतेः कृष्णस्यमूर्तिसद्भावाच्चमिलस्यायु
क्तत्वात् मिश्रत्वंतुसत्त्वरजस्तमोगुणयुक्तंसंसारिणांज्ञाना
नंदनिरोधायकंनित्यमीश्वरक्रीडापरिकरं प्रदेशभेदान्नाम
गुणसाम्यं प्रदेशभेदाच्चसदृशंतन्भवति ईदृच

विकारजनकत्वात्प्रकृतिरुच्यते ज्ञानविरोधादविद्या वि
चित्रसृष्टिकारणमायेति चतुर्विंशतितत्त्वात्मकं च तत्र
चप्रथमतत्त्वप्रकृतिप्रसूताश्चाविच्छक्तमोविच्छक्तमो
क्षरागध्रुवस्थायुक्तायाःतस्याःगुणत्रयवैषम्यान्महा
दिविकाराजायंतेगुणःसत्वतमोरजोभिस्तानिपुन
नेःस्वाविकगुणकृतानि प्रकृत्यवस्थायामनुद्भू
तानिसत्वंज्ञानस्वरूपकंतत्कुत्स्यसंज्ञनंकं रजो
रागंदृष्णाकर्मजनकं तमोविपरीतज्ञानावद्य
ताप्रालस्यादि निजनयति एतेषांगुणानांसा

साम्यविकारापि साम्यमापन्नावति प्रत्यविकरि
नाःविषयविकारेषु प्रथमविकारोमहान् प्रथमसात्वि
कराजसतामसभेदेनत्रिविधः प्रथमसायाजनकश्च
तस्मैवैकारिकतैजसभूतादिरितित्रिधाहंकारोजायते
प्रथमनिमानहेतुः वैकारिकाहंकारात्तु श्रोत्रत्वगचक्षुर्जि
ह्वाघ्राणरूपज्ञानेंद्रियाणि वाक्पाणिपादपायूपस्थात्म
कंकर्मेंद्रियाणिमनश्चजायते भूतादःशब्दतन्मात्रमुत्पद्य
तेएतस्यकाशस्यस्पर्शतन्मात्रोत्पद्यते एतस्यवायुरू
पतन्मात्रंएतस्यतेजोरसतन्मात्रंएतस्यआपोगं
एतस्यपृथ्वीविश्वस्यगंधतन्मात्रादि तत्रश्रोत्रचतुष्

यमाकाशादि-भूतचतुष्टयं कार्यं वाक्यादि चतुष्टये कारण
मिति चाङ्कः तन्मात्र भूत सूक्ष्मावस्थाहंकारद्वयस्य स्वस्वकार्य
यं मनआदिचतुष्टये कारणमिति चाङ्कः तन्मात्रा सूक्ष्मावस्था भूत
हंकारद्वयस्य स्वस्वकार्यस्य राजसाहंकार सहकारि सात्वि
काहंकारस्य श्रोत्रादिज्ञानेंद्रियजननेशश्च तन्मात्रादिपंचक
क्रमेण सहकारित्ववंति वागादिकर्मेंद्रियस्य ईशश्च तादिसह
कारि मनसश्चोभयेषामपि सहकारित्वेन अतएवेंद्र
ियाणां भूतकार्यत्वं भूतानामाप्यायनेकाकारत्वं मन्यमे
तत्सर्वं पिंडिकृत्यांडं कृत्वा तत्र भगवान् चतुर्मुखं सृजति
संऽमऽकारणानि चाधारकभगवतासृष्टानि अंडं तच्च ७

दाङ्कः तदनुपपन्नं इहत्वमिति नवरूपेण प्रतीयमानत्वात् कथन्नि
त्यो निरवयवो विभुः अप्रत्यक्ष आकाइत्याङ्कः तन्नोपपद्यते भूतादि
कार्यत्वात् अहंकारादिवदनित्यत्वात्च चक्षुविषयत्वाच्च त्वगिंद्रि
यग्राह्यत्वाच्चायोरप्रत्यक्षतोऽनुपपत्तेर्जोन्नोमादिनेदनवकुविधेत
त्रादित्यादितेजःस्थिरं दीपादितेजस्वरतेजसोरूपंरक्तं स्पर्शस्तूष्णः
जलरूपंशुक्लंशीतस्पर्शःमधुरोरसः प्रथिव्यारूपंरसोबकुविधेप
श्चिवायोरनुष्णशीतस्पर्शः एवमचिंत्यकर्तृ ईश्वरनिरूपणे इश्व
रस्तुनिखिलहेयप्रत्यनीकतेतज्ञानानंदैकस्वरूपो ज्ञानशक्त्यादि
कल्याणगुणविभूषितः सकलजगत्सर्गस्थितिकर्ता आर्तत्रित्र
सु अथार्थज्ञानिरूपचतुर्विधोधिकारिसमाश्रयणीयो धर्मार्थकाम
मोक्षाख्यचतुर्विधफलप्रदो वि

लक्षणविग्रहयुक्तो लक्ष्मीनृसिंहलीलानायकस्य अखिलहेयप्रत्य
नीकत्वं नाम नमस्तेजोन्तर्यामित्वं अतर्क्यामित्वं चेतनगतदोषप्रसंग
इतिभावो वा मशरीरगतबाल्यादीनां शरीरादि असंस्पर्शात् आनंद
रूपत्वेनम आनंदरूपत्वं ज्ञानरूपत्वंतच्च नुकूलत्वं चप्रकाशत्वं च
ज्ञानशक्त्याश्रयस्तु नित्यनिःसीमनिरुपाधिनिःसंख्यानिदोषसमाप्य
धिकरणरहितश्च एतेषुगुणेषु वात्सल्यादिविषयाः अनुकूलाः शौर्य
दिविषयाः प्रतीकूलाः एतत्कारणज्ञानादीनां सर्वत्रविषयाः ज्ञानम
ज्ञानांशक्तिरशक्तानां क्षमासापराधानां अपराधानां वत्सलसदोष
नांस्नेहशैत्यंमन्दानां आर्जवंकुटिलानांस्नेहार्द्रंदुष्टहृदयानां मार्दवं वि
श्लेषनीरुणांस्नेहन्यदुष्टकामानां एवंभगवदनुरूपयोगेईष्टव्यः स

अधिकारणादिहेतु ५

त्तिपदार्थश्चेतनानंतसंख्यातानि
तुर्दशभुवनसहितानि एकैकंदशगुणितसप्तवर्णवृत्तानि इ
श्वराक्रीडाकंदुकस्थानियानि जलबुद्बुदवदेकस्मिन्काले स्थ
स्थानि महाभूतेषु आकाशभवकाशहेतुर्वायुर्वहनादिहेतुर
सस्नेचनपरिणामादिहेतुश्चाग्नेर्दाहपाकादिहेतुर्ज्ञानेंद्रियाणांशब्दादयोगुणाःगु
णविनिमयस्तुपंचीकरणविषयाः वाग्यादीनांविसर्गशिल्पग
त्युत्सर्गयोविषयाः मनःसर्वेषांसहकारि आकाशादीनांस
र्वेषांभूतानांक्रमेणशब्दादयोगुणाः नीलेनभूमिप्रत्ययोव्य
तएवोपपद्यते पर्वतन्मानोत्तरसहितोत्तरोत्तर
मात्राणांस्वकार्यजनकत्वेनगुणाधिक्यमस्तितिवाग्यंति

सत्वश्चत्यइतिकालउच्यते अयंचप्रधानतत्कार्यपरिणामहेतुः
कलाकाष्ठामुऊर्त्तादिभेदेनपरिणामि नित्योभगवतश्चोद्यो
परिकरभूततच्छरीरभूतश्चपूर्ववचित्रयंईश्वरस्यचेतना
नांभोग्यभोगोपकरणभोगस्थानानिभजतेभोगशब्देनवि
षयानुच्यंतेभोगोपकरणानिइंद्रियाणिभोगस्थानानिदेहानि
च पूर्वस्यअधःपरिछेदोविद्यते नतिर्य्यगुर्द्ध्वंच द्वितीयायाश्चा
परिपरिछेदनतिर्यगधश्चैव कालस्त्वनयविभूत्योवर्त्ततेचित्रका
लःपरमाकाशेनित्यः इहानित्याऊर्द्धवेचित्रकालोनास्तीतिबु
वंतेप्रत्यक्षादिप्रमाणसिद्धत्वादनुपपन्नं आकाशएवांतरा
लादिशःप्रथकपदार्थत्वं आवर्णभावएवाकाशइतिकेचि

त्सर्वेश्वरएवसकलजगत्कारणभूतःकेचित्प्रधानंकारणकारण
माहुःप्रमानुसाधनेपरमाणुभावात् यतोवाइमानिभूतानीत्यादिश्रु
तिविरोधश्चेत् नोपपद्यते प्रधानंकारणंइतिकापिलैः तदपितस्या
चेतनत्वात् ईश्वराधिष्ठानाभावेपरिणामाभावात्सृष्टिसंहारानुपप
त्तेः अतएवचेतनोपिनकारणभूतःकथमितिचेत्तदुच्यते कर्मव
श्यत्वात्दुःखित्वाच्चतस्मादीश्वरएवकारणभूतः अस्याकारणत्वात्
अविद्याकर्मनिद्योत्पत्तेरनुपपत्तेरनवतिकिंतुस्वच्छयास्वसंकल्पस्य
तस्यफलंकेवललीलैव संसारेलीलान्यतिचेत्तस्यापिलीलात्वात्
अस्त्येवजगदाकारेणपरिणामःकृपादानत्वंचनहिनिर्विकारश्रुतिवि
रोधइतिचेन्नस्वरूपपरिणामेन्युपगमात् तर्हिजगत्परिणामःक
थमितिचेदुच्यते चिदचिद्विशिष्टस्यब्रह्मणोविशेषेणपरिणामेविशि
ष्टपरिणामस्योपपन्नत्वात् सृष्टिनामि अचेतनस्यस्वरूपपरिणाम
चेतनपरिणामश्चेतनस्यशरीरप्रदानपूर्वविकारश्चस्थितितुस्व

सृष्टिवस्तुषु प्रविश्य सर्वविधरक्षाकरणं संहारस्तु सर्वविशयान्तर
प्रवणत्वेन करणकलेवरवैधुर्यकरणं एतन्नात्र चतुर्विधं भवति सृष्टे
चतुर्मुखस्य नवप्रजापतीनां कालस्य सकलजगतो वांतर्यामिरजो
गुणयुक्तः सृजति स्थितौ विष्णवादिरूपेणावतिर्यमन्वादिमुखेन शास्त्र
प्रवर्तनसत्पथसन्मार्गप्रदर्शकालस्यसकलभूतानांसत्त्वसंपन्नस्थिति
करोति संहरे रुद्रादिरूपेणांतकादिसर्वभूतानांतर्यामितमोगुणयुक्तसंह
रति ननुकोश्चित्सुखिनः कोश्चिद्दुःखिनश्च स्यात्तिवैषम्यादिकमाया
तिरिति चेत्सर्वकर्ममूलतयावैशम्यकरणदोषः मस्मात्सकलजी
वनैकजिह्वकनकरणबटुपमात वर्द्धितपरेलकरणेच्छ सृष्ट्यादिकं
विग्रहविशिष्टएवकरोति विग्रहश्च स्वरूपगुणेन्यश्चात्यंतभिन्नि
मतः स्यानुरूपोनित्यएवरूपः शुद्धसत्त्वात्मकोदिव्यात्मस्वरूपप्र
काशको निरवधिकतेजरूपोनित्यमुक्तानुभाव्यः सकलतापहरो

नेतावतारकर्मभूतः सर्वरक्षकः सर्वाश्रयनातोस्यभूषणत्रि
भूषितईश्वरस्वरूपं परव्यूहविभवान्तर्यामिस्वरूपं मत्स्यकूर्मवि
रूपेणपंचविधंपरत्वेनामनित्यविभूतोनित्यमुक्तानुभाव्यस्वरू
पत्वं व्यूहस्तुसृष्टिस्थितिसंहारार्थंसंसाररक्षार्थंमुपासकाना
मनुग्रहार्थंचसंकर्षणप्रद्युम्नानिरुद्धरूपेणावस्थानंपरवासु
देवज्ञानशक्तिबलैश्वर्यवीर्यतेजांसिपूर्णानिव्यूहैकस्मिन्गु
णद्वयंप्रकाशनेशंकर्षणेज्ञानबलयुक्तो जीवतत्त्वमधिष्ठाय प्रज
नंविधिवच्च जगत्संहारंचकरोति प्रद्युम्नस्तेश्वर्यवीर्ययुक्तोमनस
त्वमधिष्ठायधर्मपिदृशंमनुचतुष्टयंशुद्धवर्गसृष्टिंकरोति अनिरुद्धः
शक्तितेजोयुक्तोरक्षणतेजमधिष्ठायब्रह्मप्रलयंकालसृष्टिंनित्यसृ
ष्टिंचकरोति विभवावतारेषुमुख्यभेदनानिन्नश्चमनुष्यत्वादिवत्गुणत्व
मपिदृष्टिकोनस्वरूपयुक्तो अप्रतिहतविग्रहयुक्तः अजडस्वभावो वि

भवाः दिपादुत्पन्नदीपनिभा मुख्यप्रदुर्भावाः मुमुक्षुपाश्रयाः
विधिशिवपावकव्यासजामदग्न्यार्जुनवित्तेशादिरूपगोणप्रदुर्भ
वाः अहंकारयुक्तजीवत्वाधिष्ठानत्वं मुमुक्षुणानुपास्याः नित्यो दि
त्तनोदितादित्तेदः जाग्रत्स्वप्नसुषुप्तिचतुरात्म्यकेशवादिमूर्त्यंतरभेद
विंशद्भेदभिन्नप्रभवादिविभवानुपेंद्रत्रिविक्रमधाधिनक्रहय
ग्रीवनरनारायणहरिलक्ष्मीसमस्यकूर्मवराहावतारविशेषाः तत्त
द्भुजायुद्धवर्णसंस्थानादिभेदाः अवतारवधिकत्वात्तत्र विविच्य
न विविच्य कथयामः श्रीपंचरात्रपरिभाषाज्ञानीनांशक्यमेवज्ञातुं अ
वतारणं हेतुरिष्टाप्रयोजनंतुसाधुपरित्राणं दुष्कृतविनाशधर्मस्थाप
नंच युगादिनाजातइतिपौराणप्रसिद्धः अवतारहेतुकमीतिनचया
यं तन्नशापस्तुव्याजमात्रं अवतारस्यैधिकत्वं प्रतिपादयन्तिः
प्रपन्नेःपरिहृततत्वात् अंतर्यामिनाम अंतर्विश्वनियन्तृत्वं

स्वर्गनरकादिसर्वावस्थासकलचेतनानांसहायभूतः शुभा
श्रयविग्रहसहितोध्यानार्चापरिक्षणार्थंचबंधुभूतोहृदयकमलो
दरनिवसनीति अर्चावतारस्तु चेतनाचेत
नात्मकमूर्तद्रव्यविग्रहत्वाद्विर्द्रादिवत्देशकालादिनि
यमरहित्येनसन्निधिंकृत्वा अपराधानवेक्ष्यमाणश्च परंत
समस्तव्यापारवृत्तिरूपे रुचिजनकत्वंशुभाश्रयत्वं अशेषजी
वशरणत्वंच अर्चावतारेपरिपूर्णं स्वस्वामित्वसंबंधस्य
न्यायेन अज्ञवत् अस्वतंत्रभावस्थानेवि अपारकारुण्य
परवशः सर्वंवेशितंदास्यति द्राविडानुनिबध्यसामलिवाक्यै
भंग्यालवमेतत्सर्वंसुरूक्तंसर्वानुजिघृक्षयासंस्कृतंवांछया
स्माभिरचितोयंप्रबंधः इति श्रीपरमहंसपरिव्राजकाचार्य
यतितल्पजनपरकोर्ये [illegible]

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

भगवान लालेन स्वहस्तेन विक्रमसंवत्सरे १९१७
लिखितं रामानुजमतसंस्थापकं रामानुजाचार्य
कृतं तत्त्वत्रयं

१२